सह धर्म्मं चरतां इति नियमं कृत्वा कन्या-दानम्। यथा,—

"इत्युक्त्वा चरतां धर्म्मं सहजा दीयतेऽर्थिने।
स कायः पावयेत्तज्जः षट् षड्वंश्यान् सहा-त्मना॥"

इति मिताक्षरा॥

कायः कः प्रजापतिर्द्देवता अस्येति प्राज पत्य इत्यर्थः। इत्युदाहृततत्त्वम्॥ (तथा च मनुः। ३। ३०।

"सहोभौ चरतां धर्म्ममिति वाचानुभाष्य च।
कन्याप्रदानमभ्यर्च्च्य प्राजापत्यो विधिः स्मृतः॥"

प्राजापत्या, स्त्री, (प्रजापतिर्द्देवतास्या इति। प्राजापति+ण्यः। स्त्रियां टाप्।) प्रव्रज्या-श्रमपूर्व्वकर्त्तव्यप्रजापतिदेवताकसर्व्वस्वदक्षिणा इष्टिः। यथा, मानवे ६ अध्याये।

"प्राजापत्यां निरूप्येष्टिं सर्व्ववेदसदक्षिणाम्।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्-गृहात्॥"

प्राजिता, [ऋ] पुं, (प्राजतीति। प्र+अज्+तृच्। वीभावाभावः।) सारथिः। इत्यमरः। २। ८। ५९॥ प्रकृष्टगन्तरि, त्रि॥

प्राज्ञः, पुं, (प्रकर्षेण जानातीति। प्र+ज्ञा+कः। ततः प्रज्ञ एव स्वार्थे अण्।) कल्कि-देवस्य ज्येष्ठभ्राता। यथा,—

"कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च शम्भले।
कविं प्राज्ञं सुमन्त्रञ्च पुरस्कृत्य महाप्रभम्॥"

इति कल्किपुराणे द्वितीय अध्यायः॥

पण्डितः। इत्यमरः। २। ७। ५॥ (यथा,—

"पण्डिते च गुणाः सर्व्वे मूर्खे दोषा हि केवलम्
तस्मान्मूर्खसहस्रेषु प्राज्ञ एको विशिष्यते॥"

इत्युद्भटः॥)

राजशुकः। इति राजनिर्घण्टः॥ (प्रकर्षेण अज्ञः इति विग्रहे मूर्खोऽपि॥)

प्राज्ञः, त्रि, (प्रज्ञ+स्वार्थे अण्। यद्वा, प्रज्ञा-स्यस्येति। अच्।) पण्डितः। (यथा, महा-भारते। १। १४६। १९॥

"पौरेषु विनिवृत्तेषु विदुरः सर्व्वधर्म्मवित्।
बोधयन् पाण्डवश्रेष्ठमिदं वचनमब्रवीत्॥
प्राज्ञः प्राज्ञं प्रलापज्ञः प्रलापज्ञमिदं वचः॥")

दक्षः। इति शब्दरत्नावली॥ (विज्ञः। यथा, मनुः। २। १२३।

"नामधेयस्य ये केचिदभिवादं न जानते।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्व्वास्तथैव च॥")

प्राज्ञमानी, [न्] त्रि, (आत्मानं प्राज्ञं मन्यते इति। प्राज्ञ+मन्+णिनिः।) पण्डिताभि-मानी। यथा, चरके।

"दुःखिताय शयानाय श्रद्दधानाय रोगिणे।
यो भेषजमभिज्ञाय प्राज्ञमानी प्रयच्छति॥"

प्राज्ञा, स्त्री, (प्रज्ञास्त्यस्या इति। अच्। टाप्।) बुद्धिमती। तत्पर्य्यायः। धीमती २। इत्य-मरः। २। ६। १२॥ बुद्धिः। यथा,—

"प्रज्ञा प्राज्ञा धरा ज्ञप्तिः पण्डा संवेदनं विदा"

इति रायमुकुटधृतशब्दार्णवः॥

प्राज्ञी, स्त्री, (प्रज्ञ+स्वार्थे अण्। ङीप्।) स्वयं ज्ञात्री। तत्पर्य्यायः। प्रज्ञा २। इत्यमरः।२। ६।१२॥ पण्डितपत्नी। इति प्राज्ञशब्दटीकायां भानुदीक्षितः॥

प्राज्यं, त्रि, प्रवीयते इति। प्र+अज्+ण्यत्। वीभावाभावः।) प्रचुरम्। इत्यमरः।३।१।६३॥ (यथा, कुमारे। २। १९।

"स्वागतं स्वानधीकारान् प्रभावैरवलम्ब्य वः।
युगपद्युगवाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः॥"

प्रभूतं आज्यं घृतं यस्येति 'विग्रहे प्रचुरघृत-सम्पन्नः। प्रकृष्टमाज्यमिति विग्रहे प्रकृष्ट-घृते, क्ली॥)

प्राञ्जलः,त्रि,(प्र+अञ्ज+बाहुलकात् अलच्।) सरलः। यथा,—

"ऋजावजिह्मप्रगुणौ प्राञ्जलः सरलोऽपि च।"

इति जटाधरः॥

प्राट्, [छ्] पुं, पृच्छति यः। (प्रच्छ+"क्विप् वचिप्रच्छीति।" उणा० २। ५७। इति क्विप् दीर्घः सम्प्रसारणाभावश्च।) प्रश्नकर्त्ता। इति मुग्धबोधव्याकरणम्॥

प्राड्विवाकः,पुं,(पृच्छतीति प्राट् विविच्य वक्तीति विवाकः। ततः कर्म्मधारयः।) व्यवहारद्रष्टा। जज् इति इङ्गरेजी भाषा। तत्पर्य्यायः। अक्ष-दर्शकः २। इत्यमरः। २। ८। ५॥ व्यवहार-दर्शी ३। इति शब्दरत्नावली॥ हे व्यव-हाराणां ऋणादानादिविवादानां द्रष्टरि निर्ण्ण-तरि धर्म्माध्यक्षे इत्यर्थः। पृच्छति वादिप्रति-वादिवाक्यं प्राट् दद्दज्जुहवाक् प्राड़िति निपातः विविच्य वक्ति विवाकः कभावेऽमी इति घञ् प्राट् चासौ विवाकश्चेति प्राड्विवाकः।

"विवादानुगतं पृष्ट्वा पूर्व्ववाक्यं प्रयत्नतः।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः॥"

इति स्मृतिः। इति भरतः॥

अपि च। अर्थिप्रत्यर्थिनौ पृच्छतीति प्राट् तयोर्वचनं विरुद्धाविरुद्धञ्च सभ्यैः सह विवि-नक्ति विवेचयति वेति विवाकः प्राट् चासौ विवाकश्चेति प्राड्विवाकः। उक्तञ्च।

"विवादानुगतं पृष्ट्वा ससभ्यस्तत् प्रयत्नतः।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः॥"

इति मिताक्षरा॥

प्राणः, पुं, (प्राणिति जीवति बहुकालमिति। प्र+अन्+अच्। प्राणित्यनेनेति करणे घञ् वा।) ब्रह्मा। इति त्रिकाण्डशेषः॥ हृत्मा-रुतः। (यदुक्तम्।

'हृदिप्राणो गुदेऽपानः समानो नाभिसंस्थितः')

बोलः। काव्यजीवः। अनिलः। बलम्। (यथा, हरिवंशे। ८६। ३६।

"बाहुप्राणेन शूराणां समाजोत्सवसन्निधौ॥")

पूरिते,त्रि। इति मेदिनी॥ सूक्ष्मशरीरसमष्ट्यु-पहितचैतन्यम्॥ प्रागगमनवान् नासाग्रस्थान-वर्त्ती वायुः। इति वेदान्तसारः॥ तस्य कर्म्म बहिर्गमनम्। इति श्रीधरस्वामी॥ तस्य रूपं स्थानानि च यथा,—

"इन्द्रनीलप्रतीकाशं प्राणरूपं प्रकीर्त्तितम्।
आस्यनासिकयोर्म्मध्ये हृन्मध्ये नाभिमध्यगे॥
प्राणालय इति प्राहुः पादाङ्गुष्ठेऽपि केचन॥"

इति योगार्णवः॥

(यथा महाभारते। १२। ३२८। ३५।

"प्राणिनां सर्व्वतो वायुश्चेष्टां वर्त्तयते पृथक्।
प्राणनाच्चैव भूतानां प्राण इत्यभिधीयते॥")

पञ्चप्राणविवरणं बहुवचनान्तप्राणशब्दे द्रष्ट-व्यम्॥ धातुः पुत्त्रः। यथा,—

"आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः।
भार्य्ये धातृविधात्रोस्ते तयोर्जातौ सुतावुभौ॥
प्राणश्चैव मृकण्डुश्च पिता मम महायशाः॥"

इति मार्कण्डेये रुद्रसर्गाध्यायः॥

(धरपुत्त्रविशेषः। यथा मत्स्यपुराणे।५।२३-२४

"द्रविणो हव्यवाहश्च धरपुत्त्रावुभौ स्मृतौ।
कल्यानिन्यां ततः प्राणो रमणः शिशिरोऽपि च॥
मनोहरा धरात् पुत्त्रानवापाथ हरेः सुता॥")

प्राणकः,पुं,(प्राणैः प्राणेन वा कायतीति। कै+कः।) सत्त्वजातीयः। प्राणिमात्रम्। जीवक-द्रुमः। बोलः। इति मेदिनी। के, ११५॥

प्राणथः, पुं, (प्राणित्यनेनेति। प्र+अन् प्राणने +"शीङ्शपिरुगमीति।"उणा० ३। ११३। इति अथः।) वायुः। (प्राणितीति। कर्त्तरि अथः।) बलवान्। इत्युणादिकोषः॥ प्रजा-पतिः। तीर्थम्। इति संक्षिप्तसारोणादिवृत्तिः॥

प्राणदं, क्ली, (प्राणं प्राणनं बलं वा ददातीति। प्राण+दा+"आतोऽनुपेति।" ३। २। ३। इति कः।) जलम्। रक्तम्। इति हेमचन्द्रः। ४। १३६॥ (प्राणदातरि, त्रि। यथा, कथा-सरित्सागरे। २८। ६॥

"अर्थप्रदानमेवाहुः संसारे सुमहत् तपः।
अर्थदः प्राणदः प्रोक्तः प्राणा ह्यर्थेषु कीलिताः॥")

प्राणदः, पुं, (प्राणं ददातीति। दा+कः।) जीवकवृक्षः। इति राजनिर्घण्टः॥

प्राणदा,स्त्री,(प्राणं जीवनं बलं वा ददातीति। दा कः। टाप्।) ऋद्धिवृक्षः। हरीतकी। इति राजनिर्घण्टः॥ (प्राणदात्री। यदुक्तम्।

"यशोहरे किमाश्चर्य्यं प्राणदा यमदूतिका॥")

प्राणनं, क्ली, (प्र+अन प्राणने+ल्युट्।) जीव-नम्। इति जटाधरः॥ (यथा, भागवते। ३। २६। ४१।

"क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम्
तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः॥"

चेष्टनम्। यथा, ऋग्वेदे। १। ४८। १०।

"विश्वस्य हि प्राणनं जीवनं त्वे वियदुच्छसि सूनरि॥"

"हे सूनरि उषोदेवि विश्वस्य सर्व्वस्य प्राणि-जातस्य प्राणनं चेष्टनं जीवनं प्राणधारणञ्च।"